## पत्र-लेखन सम्बन्धी आवश्यक निर्देश

पत्र जितना संक्षिप्त एवं व्यवस्थित रूप में लिखा जाएगा, वह पाठक को उतना ही अधिक प्रभावित करेगा । अतः पत्र को अधिक आकर्षक, बोधगम्य एवं असंदिग्ध बनाने के लिए निम्नलिखित बिन्दुओं पर विशेष ध्यान देना चाहिए–

1. पत्र-लेखन बहुत ही सरल एवं स्पष्ट भाषा में होना चाहिए ।
2. वाक्य यथासंभव छोटे और सारगर्भित होने चाहिए ।
3. पत्र जिस उद्देश्य से लिखा जा रहा हो, उसका स्पष्ट उल्लेख होना चाहिए ।
4. पत्र में अनावश्यक बातों एवं विशेषणों का प्रयोग न करें ।
5. जिसके लिए पत्र लिखा जा रहा है, उसके लिए यथोचित संबोधन प्रयुक्त करना चाहिए ।

## वैयक्तिक (अनौपचारिक) पत्रों के अङ्गों का स्थान-निर्देश

1. स्थान और दिनांक आदि – पत्र के दायीं ओर भेजने वाले का पूरा पता, उसके नीचे दिनांक लिखी जाती है । जैसे-

आदर्श विद्यामन्दिर

भरतपुर

दिनांकः- 28.08.20

2. स्थान के नाम के साथ पंचमी विभक्ति के स्थान पर 'तसिल्' (तः) प्रत्यय का भी प्रयोग किया जा सकता है जैसे– 'जयपुरात्' के स्थान पर 'जयपुरतः' आदि ।

3. वर्तमान समय में स्थान के साथ पंचमी विभक्ति व 'तसिल्' (तः) प्रत्यय की जगह नपुंसकलिङ्ग प्रथमा विभक्ति एकवचन का प्रयोग किया जा सकता है । जैसे – जयपुरम्, दिल्लीनगरम् आदि ।

4. दिनांक लिखने में (पत्र के दायीं ओर स्थान के नीचे) हिन्दी की शैली अपनाई जा सकती है जैसे- 04.08.20__ आदि

5. सम्बोधन – पत्र के बायीं ओर किनारे पर आदरसूचक या स्नेहसूचक सम्बोधन-शब्दों द्वारा जिसे पत्र लिखा जाता है उसी के अनुरूप सम्बोधन का प्रयोग किया जाना चाहिए । ये सम्बोधन के शब्द पत्र के बायीं ओर लिखे जाने चाहिए, जैसे-

परमादरणीयाः पितृमहाभागाः , पूज्यपाद मित्रः !,

सादरं प्रणतिः ।

6. नमस्कारात्मक शब्द– अभिवादन में अपने से बड़े के लिए प्रणामः, प्रणतिः, सादराभिवादनम् आदि शब्दों का प्रयोग, बराबर वालों (मित्रों आदि) के लिए नमस्ते, वन्दे, अभिनन्दनम् आदि शब्दों का प्रयोग तथा अपने से छोटों के लिए शुभाशिषः, चिरञ्जीव, प्रिय आदि शब्दों का प्रयोग किया जाना चाहिए ।

7. कुशल-सूचना – विषयवस्तु लिखने से पूर्व कुशल-सूचना लिखी जानी चाहिए, जैसे- 'अत्र कुशलं तत्रास्तु । सर्वं कुशलं भवान्/भवती अपि तथैव स्यात्' आदि ।

8. मुख्य विषय – अभिवादन के नीचे कुशल समाचार लिखे जाने के बाद मुख्य विषय के रूप में सन्देश लिखा जाना चाहिए । विषय-वस्तु ऐसी होनी चाहिए कि पत्र पढ़ने वाला स्पष्ट रूप से समझ सके ।

9. उपसंहार – मुख्य विषय या सन्देश के पश्चात् छोटे-बड़ों को यथायोग्य अभिवादन प्रस्तुत करके पत्र का उपसंहार किया जाना चाहिए ।

10. निवेदन – सन्देश अथवा मुख्य विषय की प्रस्तुति के पश्चात् नीचे दाहिनी ओर निवेदन के रूप में भवदाज्ञाकारी, भवदीयः, भवत्कः, विनीतः, शुभेच्छुः आदि शब्दों का प्रयोग करके अपना नाम लिखना चाहिए ।

अन्य – यह विशेष ध्यान देने योग्य बिन्दु है कि पत्र लिखते समय यह ध्यान रखना चाहिए कि प्रश्नपत्र में जिसे पत्र लिखने के लिए कहा जाए, जिस नाम और स्थान से लिखने को कहा जाए तथा जो भी आपका नाम लिखने के लिए कहा जाये, परीक्षा में नाम एवं स्थान आदि के स्थान पर उन्हीं का प्रयोग किया जाना चाहिए । प्रश्नपत्र में कहे गये सम्बोधन का ही उल्लेख करना चाहिए । अपना स्वयं का वास्तविक नाम, स्थान तथा अन्य कोई काल्पनिक नाम व स्थान नहीं लिखना चाहिए ।

Scanned with CamScanner

## संक्षेप में पत्र का प्रारूप

(i) स्थान ................

(ii) दिनाङ्क ................

(iii) सम्बोधन

(iv) अभिवादन

(v) कुशल-सूचना (vi) सन्देश (मुख्य विषय) ..........................................................................................

..........................................................................................

(vii) उपसंहार ..........................................................................................

(viii) पत्र लिखने वाले का नाम

(हस्ताक्षर)

उपर्युक्त निर्देशों को निम्नलिखित सारणी द्वारा संक्षेप में स्पष्ट किया गया है–

| क्रम | सम्बन्ध | सम्बोधन | अभिवादन | निवेदन |
|---|---|---|---|---|
| 1. | पुत्र का पिता को | (i) पूज्यपाद पितः !<br>(ii) आदरणीय पितृपाद !<br>(iii) पूज्यपाद पितृमहोदय !<br>(iv) पूज्यपादाः पितृमहोदयाः !<br>(v) परमश्रद्धेयेषु पितृचरणेषु ! | (i) सादरं नमो नमः ।<br>(ii) चरणारविन्देषु सादरं प्रणामम् ।<br>(iii) सादरं प्रणामम् ।<br>(iv) सादरं प्रणतिः । | (i) भवदाज्ञाकारी पुत्रः<br>(ii) भवतः विनीतः बालः<br>(iii) भवदीयः प्रियः सुतः<br>(iv) भवत्प्रियः सूनुः<br>(v) भवदाज्ञापालकः सुतः |
| 2. | पिता का पुत्र को | (i) प्रियपुत्र (नाम) ! | (i) चिरञ्जीव । | (i) त्वदीयः शुभचिन्तकः |
| 3. | मित्र का मित्र को | (i) प्रियमित्र (नाम) !<br>(ii) प्रियसुहृद् (नाम)! | (i) नमो नमः ।<br>(ii) सप्रेम/सस्नेह नमो नमः ।<br>(iii) नमस्ते, वन्दे, अभिनन्दनम् | (i) भवदीयं मित्रम्<br>(ii) तव स्निग्धं मित्रम्<br>(iii) भवद् बन्धुः<br>(iv) स्नेहाङ्कितः |
| 4. | छोटे भाई को (अनुज) | (i) प्रिय (नाम) !<br>(ii) प्रिय भ्रातृवर (नाम) ! | (i) शुभाशीर्वादम्<br>(ii) प्रसीदतु | (i) भवदीयो भ्राता<br>(ii) त्वदीयो भ्राता |
| 5. | बड़े भाई को (अग्रज) | (i) आदरणीयभ्रातृपद !<br>(ii) आदरणीयभ्रातः ! | (i) सादरं नमस्कारम् ! | (i) भवदीयो भ्राता<br>(ii) भवदाज्ञाकारी |
| 6. | बहन का बड़े भाई (अग्रज) के लिए | (i) आदरणीयभ्रातः ! | (i) नमस्कारम् | (i) भवदीया स्नेहाधीना भगिनी<br>(ii) भवदीया भगिनी |
| 7. | बहन का छोटे भाई (अनुज) को | (i) प्रियभ्रातः ! | (i) शुभाशीर्वादम् | (i) भवदीया भगिनी |
| 8. | भाई का बहन बड़ी/छोटी को | (i) आदरणीये भगिनि !<br>(ii) प्रिये भगिनि ! | (i) शुभाशीर्वादम् | (i) भवदीयः प्रियभ्राता<br>(ii) त्वदीयः प्रियभ्राता |
| 9. | प्रकाशक आदि के लिए | (i) श्रीमान् प्रकाशक महोदय ! | (i) नमो नमः | (i) भवदीयः/भवदीया<br>(ii) भवत्कः/निवेदकः |

Scanned with CamScanner

अत्र अभ्यासार्थं कानिचन पत्राणि दीयन्ते। छात्राः तानि पठित्वा पत्रलेखनस्य अभ्यासं कुर्युः। (यहाँ अभ्यास के लिए कुछ पत्र दिये गए हैं। छात्रों को उनको पढ़कर पत्र लिखने का अभ्यास करना चाहिए।)

● पाठ्यपुस्तक में प्रदत्त पत्र

## अनौपचारिक-पत्राणि

### (1) पित्रे पत्रम्

जयपुरतः

दिनाङ्कः 11.03.20__

श्रद्धेयेषु पितृचरणेषु,

सादरं प्रणामाः।

अत्रकुशलं तत्रास्तु। भवदीयं स्नेहापूरितं पत्रम अद्यैव अहं प्राप्तवान्। सम्पूर्णं वृत्तं च ज्ञातवान्। अधुना मम वार्षिकी परीक्षा प्रचलति। परीक्षायाम् इदानीं यावत् सर्वाणि प्रश्नपत्राणि सम्यक् अभवन्। शेषविषयाणां स्थितिः अपि समीचीना वर्तते। आशासे यत् परीक्षायाम् उत्तमान् अङ्कान् प्राप्य कक्षायां श्रेष्ठस्थानं प्राप्स्यामि।

परीक्षानन्तरं शीघ्रमेव गृहम् आगमिष्यामि। पूजनीयेषु मातृचरणेषु मम प्रणामः कथनीयः। अनुजाय आशिषः।

भवदाज्ञाकारी पुत्रः

राकेशः

**हिन्दी अनुवाद—** पिता के लिए पत्र

जयपुर

दिनाङ्कः 11.03.20__

श्रद्धेय पिता के चरणों में

सादर प्रणाम।

यहाँ कुशल हैं, वहाँ भी कुशल हों। आपका स्नेह (प्रेम) भरा हुआ पत्र आज ही मुझे प्राप्त हुआ। सम्पूर्ण समाचार मालूम हुए। अब मेरी वार्षिक परीक्षा चल रही है। परीक्षा में इस समय तक सभी प्रश्नपत्र ठीक हुए हैं। शेष विषयों की स्थिति भी ठीक है। आशा है कि परीक्षा में अच्छे अङ्क प्राप्त करके कक्षा में अच्छा स्थान प्राप्त करूँगा।

परीक्षा के बाद शीघ्र ही घर आऊँगा। पूज्यनीय माताजी के चरणों में प्रणाम कहना। छोटे भाई के लिए आशीर्वाद।

आपका आज्ञाकारी बेटा

राकेश

### (2) अनुजाय पत्रम्

बीकानेरतः

संस्कृत-दिवसः

दिनाङ्कः 18.08.20--

प्रिय अनुज प्रवीण!

शुभाशीर्वादाः।

अत्र कुशलं तत्रास्तु। तव पत्रम् अद्य एव मया प्राप्तम्। पत्रं पठित्वा सर्वं वृत्तं ज्ञातं, प्रसन्नता च संजाता। त्वं संस्कृतविद्यालये आयोजिते संस्कृतसम्भाषणशिविरे भागं गृहीतवान्। एकमासस्य अभ्यासानन्तरम् अधुना त्वं संस्कृतसम्भाषणे

प्रवीण: अभवः इति अस्माकं कृते प्रसन्नतायाः विषयः वर्तते। पित्रा उक्तं यत् यदि योग्यताभिवृद्ध्यर्थं एतादृशाः अन्ये अपि कार्यक्रमाः आयोज्यन्ते तर्हि तेषु त्वया पूर्णोत्साहेन भागः गृहीतव्यः। अध्ययने अपि अवधानं दातव्यम्।

शेषं सर्वं कुशलम्। समये-समये च स्वाध्ययनस्थिति-विषये अवबोधय।

त्वदीयः शुभाकांक्षी

सुरेशः

हिन्दी अनुवाद— **छोटे भाई के लिए पत्र**

बीकानेर

संस्कृत-दिवस

दिनांक 18.08.20_ _

प्रिय अनुज प्रवीण

शुभ आशीर्वाद

यहाँ कुशल है वहाँ भी कुशल हों। तुम्हारा पत्र आज ही मुझे प्राप्त हुआ। पत्र पढ़कर सब समाचार मालूम हुए और प्रसन्नता हुई। तुमने संस्कृत विद्यालय में आयोजित संस्कृत संभाषण शिविर में भाग लिया। एक महीने के अभ्यास के बाद अब तुम संस्कृत भाषण में चतुर (होशियार) हो गये हो, यह हमारे लिए प्रसन्नता का विषय है। पिताजी द्वारा कहा गया है कि यदि योग्यता बढ़ाने के लिए ऐसे अन्य भी कार्यक्रम आयोजित होते हैं, तो उनमें तुम्हारे द्वारा पूर्ण उत्साह से भाग लेना चाहिए। पढ़ने में भी ध्यान देना चाहिए।

शेष सब कुशल हैं। समय-समय पर अपने पढ़ने की स्थिति के विषय में बताना चाहिए।

तुम्हारा शुभाकांक्षी

सुरेश

## (3) मित्राय पत्रम्

अजयमेरुतः

दिनाङ्कः 08.05.20_ _

प्रियमित्र दीपक!

नमस्ते!

अत्र अहं कुशलः, भवतः कुशलतां कामये। अहं मातापितृभ्यां सह अस्मिन् ग्रीष्मावकाशसमये भ्रमणार्थं हिमाचलप्रदेशं गमिष्यामि। भवान् अपि अस्माभिः सह तत्र चलतु इति मम प्रबलेच्छा अस्ति। वयं सर्वे तत्र मिलित्वा आनन्दानुभवं करिष्यामः। मदीयः अयं प्रस्तावः भवते रोचते चेत्, ज्ञापयतु।

परिवारे पूज्येभ्यो सर्वेभ्यो जनेभ्यो मम सादरप्रणामः निवेदनीयः। पत्रस्योत्तरं शीघ्रमेव प्रेषणीयम्।

भवतः मित्रम्

सोहनः

हिन्दी अनुवाद— **मित्र के लिए पत्र**

अजमेर

दिनाङ्कः 08.05.20_ _

प्रिय मित्र दीपक

नमस्ते।

यहाँ मैं कुशल हूँ, आपकी कुशलता की कामना करता हूँ। मैं माता-पिता के साथ इन गर्मी की छुट्टियों में घूमने के

Scanned with CamScanner

लिए हिमाचल प्रदेश जाऊँगा। आप भी हमारे साथ वहाँ चलें, इस प्रकार मेरी प्रबल इच्छा है। हम सब वहाँ मिलकर आनन्द का अनुभव करेंगे। मेरा यह प्रस्ताव आपको रुचिकर लगेगा, ठीक है सूचित करो।

परिवार में सभी पूज्यनीयों के लिए मेरा सादर प्रणाम निवेदन करना।

पत्रोत्तर शीघ्र भेजना चाहिए।

आपका मित्र

सोहन

## प्रार्थना-पत्राणि

1. भवान् दशम्याः कक्षायाः छात्रः महेन्द्रः अस्ति। स्वविद्यालयस्य प्रधानाचार्याय दिनद्वयस्य रुग्णावकाशार्थं प्रार्थनापत्रं लिखतु।

उत्तरम्—

सेवायाम्,

श्रीमन्तः प्रधानाचार्यमहोदयाः

राजकीयः आदर्श-उच्च माध्यमिक-विद्यालयः,

जयपुरम् (राज.)

विषयः- दिनद्वयस्य रुग्णावकाशार्थं प्रार्थनापत्रम्।

महोदयाः !

उपर्युक्तविषयान्तर्गते निवेदनम् अस्ति यत् अहं गतदिवसात् अतीव रुग्णोऽस्मि। अतः अहं विद्यालयम् आगन्तुं समर्थः नास्मि।

प्रार्थना अस्ति यत् 13.3.20__ तः 14.3.20__ दिनाङ्कपर्यन्तं दिनद्वयस्य अवकाशं स्वीकृत्य माम् अनुग्रहीष्यन्ति।

दिनांक

13.03.20__

भवताम् आज्ञाकारी शिष्यः

महेन्द्रः

कक्षा-दशमी

हिन्दी अनुवाद—

1. आप दशवीं कक्षा के छात्र महेन्द्र हैं। अपने विद्यालय के प्रधानाचार्य के लिए बीमार होने के अवकाश के लिए प्रार्थना-पत्र लिखिए।

उत्तर—

सेवा में,

श्रीमान् प्रधानाचार्य महोदय

राजकीय आदर्श-उच्च माध्यमिक विद्यालय

जयपुर (राजस्थान)

विषय:- दो दिन का अस्वस्थता अवकाश के लिए प्रार्थना पत्र

महोदय,

उपर्युक्त विषय के अन्तर्गत निवेदन है कि मैं गत दिन से अत्यन्त बीमार हूँ। इसलिए मैं विद्यालय आने में समर्थ नहीं हूँ।

...र्थना है कि 13.03.__ से 14.03.__ दिन तक दो दिन का मुझे अवकाश स्वीकार कर अनुगृहीत करेंगे।

Scanned with CamScanner

लिए हिमाचल प्रदेश जाऊँगा। आप भी हमारे साथ वहाँ चलें, इस प्रकार मेरी प्रबल इच्छा है। हम सब वहाँ मिलकर आनन्द का अनुभव करेंगे। मेरा यह प्रस्ताव आपको रुचिकर लगेगा, ठीक है सूचित करो।

परिवार में सभी पूज्यनीयों के लिए मेरा सादर प्रणाम निवेदन करना।

पत्रोत्तर शीघ्र भेजना चाहिए।

आपका मित्र

सोहन

## प्रार्थना-पत्राणि

1. भवान् दशम्याः कक्षायाः छात्रः महेन्द्रः अस्ति। स्वविद्यालयस्य प्रधानाचार्याय दिनद्वयस्य रुग्णावकाशार्थं प्रार्थनापत्रं लिखतु।

उत्तरम्—

सेवायाम्,

श्रीमन्तः प्रधानाचार्यमहोदयाः

राजकीयः आदर्श-उच्च माध्यमिक-विद्यालयः,

जयपुरम् (राज.)

विषयः- दिनद्वयस्य रुग्णावकाशार्थं प्रार्थनापत्रम्।

महोदयाः !

उपर्युक्तविषयान्तर्गते निवेदनम् अस्ति यत् अहं गतदिवसात् अतीव रुग्णोऽस्मि। अतः अहं विद्यालयम् आगन्तुं समर्थः नास्मि।

प्रार्थना अस्ति यत् 13.3.20__ तः 14.3.20__ दिनाङ्कपर्यन्तं दिनद्वयस्य अवकाशं स्वीकृत्य माम् अनुग्रहीष्यन्ति।

दिनांक

13.03.20__

भवताम् आज्ञाकारी शिष्यः

महेन्द्रः

कक्षा-दशमी

हिन्दी अनुवाद—

1. आप दशवीं कक्षा के छात्र महेन्द्र हैं। अपने विद्यालय के प्रधानाचार्य के लिए बीमार होने के अवकाश के लिए प्रार्थना-पत्र लिखिए।

उत्तर—

सेवा में,

श्रीमान् प्रधानाचार्य महोदय

राजकीय आदर्श-उच्च माध्यमिक विद्यालय

जयपुर (राजस्थान)

विषयः- दो दिन का अस्वस्थता अवकाश के लिए प्रार्थना पत्र

महोदय,

उपर्युक्त विषय के अन्तर्गत निवेदन है कि मैं गत दिन से अत्यन्त बीमार हूँ। इसलिए मैं विद्यालय आने में समर्थ नहीं हूँ।

प्रार्थना है कि 13.03.__ से 14.03.__ दिन तक दो दिन का मुझे अवकाश स्वीकार कर अनुगृहीत करेंगे।

Scanned with CamScanner

दिनाङ्कः
13.03.20__

आपका आज्ञाकारी शिष्य
महेन्द्र
कक्षा-10

2. आत्मानं दशम्याः कक्षायाः योगेशं मत्वा स्वविद्यालयस्य प्रधानाचार्याय पार्श्वस्थे विद्यालये आयोज्यमानासु क्रीडाप्रतियोगितासु धावन-प्रतिस्पर्धायां भागं ग्रहीतुं प्रार्थनापत्रं लिखतु।

उत्तरम्–

सेवायाम्,
श्रीमन्तः प्रधानाचार्यमहोदयाः,
राजकीय-माध्यमिक-विद्यालयः,
कोटड़ा, उदयपुरम्

विषयः- धावनप्रतियोगितायां भाग-ग्रहणम्

महोदयाः!

उपर्युक्तविषयान्तर्गतं सविनयं निवेदनम् अस्ति यत् राजकीय-आदर्श-उच्चमाध्यमिक-विद्यालये (कोटड़ा इत्यत्र) 23.09.20__ तः 25.09.20__ दिनाङ्कपर्यन्तं क्रीडाप्रतियोगिताः आयोजिताः भविष्यन्ति।

अहमपि तत्र धावनप्रतियोगितायां भाग ग्रहीतुम् इच्छामि। अतः निवेदनम् अस्ति यत् भवन्तः मां क्रीडाप्रतियोगितायां भागं ग्रहीतुम् अनुमतिं प्रदाय अनुग्रहीष्यन्ति।

भवताम् आज्ञाकारी शिष्यः
योगेशः
कक्षा-दशमी

दिनाङ्कः
20.09.20__

हिन्दी अनुवाद–

2. अपने को दशमी कक्षा का योगेश मानकर अपने विद्यालय के प्रधानाचार्य के लिए पास में स्थित विद्यालय में आयोजित खेल प्रतियोगिता में दौड़ने में भाग लेने हेतु प्रार्थना पत्र लिखिए।

उत्तर–

सेवा में,
श्रीमान् प्रधानाचार्य महोदय
राजकीय-माध्यमिक विद्यालय
कोटड़ा, उदयपुर

विषयः- दौड़ प्रतियोगिता में भाग ग्रहण करना

महोदय,

उपरोक्त विषय के अन्तर्गत निवेदन है कि राजकीय आदर्श उच्च माध्यमिक विद्यालय में (कोटड़ा यह यहाँ) 23.09.20__ से 25.09.20__ दिनांक तक खेल प्रतियोगिता आयोजित होगी।

मैं भी वहाँ दौड़ प्रतियोगिता में भाग लेना चाहता हूँ। इसलिए निवेदन है कि आप मुझे खेल प्रतियोगिता में भाग लेने हेतु अनुमति प्रदान कर अनुग्रहीत करेंगे।

आपका आज्ञाकारी शिष्य
योगेश
कक्षा-10

दिनाङ्कः
20.09.2017

Scanned with CamScanner

● अन्य महत्त्वपूर्ण पत्र

## अभ्यासः

निर्देशः – समुचितैः पदैः रिक्तस्थानानि पूरयित्वा पत्रं पुनः लिखत— (उचित पदों (शब्दों) के द्वारा रिक्त स्थानों को भर कर पत्र को पुनः लिखिए— )

(1) विद्यालयस्य वार्षिकोत्सवम् अधिकृत्य मित्रं प्रति लिखितं पत्रं मञ्जूषापदसहायतया पूरयत ।

(विद्यालय के वार्षिक उत्सव के आधार पर मित्र को लिखे गये पत्र के रिक्तस्थानों की पूर्ति मञ्जूषा में दिये पदों की सहायता से कीजिए ।)

मञ्जूषा- वार्षिकोत्सवः, कार्यक्रमम्, मित्रम्, प्रणामः, व्यस्ताः, मुख्यातिथिः, पारितोषिकानि, राम ।

परीक्षाभवनम्

दिनाङ्कः 25-03-20__

प्रिय (i)....................

अद्य तव पत्रं प्राप्तम् । अग्रे समाचारः अयम्, यत् गते सप्ताहे विद्यालयस्य (ii) .................... आसीत्। अहं सर्वे च अध्यापकाः (iii) .................... आस्मः । शिक्षानिदेशकः कार्यक्रमस्य (iv) .................... आसीत् । सः अस्माकम् (v).........प्राशंसत् । सः योग्येभ्यः छात्रेभ्यः (vi) .............. अयच्छत् । पितृभ्यां मम (vii) .............. निवेदयतु ।

भवतः (viii) ....................

क ख ग

उत्तरम् -

परीक्षाभवनम्

दिनाङ्कः 25.03.20--

प्रिय राम !

अद्य तव पत्रं प्राप्तम् । अग्रे समाचारः अयम्, यत् गते सप्ताहे विद्यालयस्य वार्षिकोत्सवः आसीत् । अहं सर्वे च अध्यापकाः व्यस्ताः आस्मः । शिक्षानिदेशकः कार्यक्रमस्य मुख्यातिथिः आसीत् । सः अस्माकं कार्यक्रमं प्राशंसत् । सः योग्येभ्यः छात्रेभ्यः पारितोषिकानि अयच्छत् । पितृभ्यां मम प्रणामः निवेदयतु ।

भवतः मित्रम्

क ख ग

### हिन्दी-अनुवाद

परीक्षा भवन

दिनांकः 25.03.20--

प्रिय राम !

आज तुम्हारा पत्र प्राप्त हुआ । आगे समाचार यह है कि गत सप्ताह विद्यालय का वार्षिक उत्सव हुआ । मैं और सभी अध्यापक व्यस्त थे । शिक्षा निदेशक कार्यक्रम के मुख्य अतिथि थे । उन्होंने हमारे कार्यक्रम की प्रशंसा की । उन्होंने योग्य छात्रों को पारितोषिक भी प्रदान किये । माताजी और पिताजी को प्रणाम निवेदन करना ।

तुम्हारा मित्र

क ख ग

Scanned with CamScanner

(2) मित्रं प्रति लिखितं निम्नलिखितं पत्रं मञ्जूषायां प्रदत्तैः उचितैः शब्दैः पूरयत ।
(मित्र को लिखे गए निम्नलिखित पत्र को मञ्जूषा में दिये गये पदों से भरिए ।)

मञ्जूषा- विना, तत्र, वयं, सस्नेहं, चेन्नईतः, ह्यः, मग्नाः अपि ।

(i)..................
दिनाङ्कः 25.03.20--

प्रिय मित्र दिवाकर !

(ii) .................. नमस्ते ।

(iii) .................. अहं मित्रैः सह जन्तुशालां द्रष्टुं कानननवनम् अगच्छम् । तत्र (iv) .................. अनेकान् पशून् अपश्याम । सर्वे पशवः इतस्ततः भ्रमन्ति स्म । सिंहाः उच्चस्वरैः अगर्जन् । मयूराः नृत्ये (v) .................. आसन् । वस्तुतः मयूरं (vi) .................. कुत्र जन्तुशालायाः भव्यशोभा ? तत्र आम्रवृक्षाः अपि आसन्, कोकिला (vii) .................. । वस्तुतः यत्र आम्रवृक्षाः (viii) .................. कोकिला तु भविष्यति एव । अग्रे पुनः लेखिष्यामि । सर्वेभ्यः मम नमस्कारः कथनीयः ।

भवदीयम् अभिन्नमित्रम्
शेखरः

उत्तरम्-

चेन्नईतः
दिनाङ्कः 25.03.20--

प्रिय मित्र दिवाकर !

सस्नेहं नमस्ते ।

ह्यः अहं मित्रैः सह जन्तुशालां द्रष्टुं कानननवनम् अगच्छम् । तत्र वयम् अनेकान् पशून् अपश्याम । सर्वे पशवः इतस्ततः भ्रमन्ति स्म । सिंहाः उच्चस्वरैः अगर्जन् । मयूराः नृत्ये मग्नाः आसन् । वस्तुतः मयूरं विना कुत्र जन्तुशालायाः भव्यशोभा ? तत्र आम्रवृक्षाः अपि आसन्, कोकिला अपि । वस्तुतः यत्र आम्रवृक्षाः तत्र कोकिला तु भविष्यति एव । अग्रे पुनः लेखिष्यामि । सर्वेभ्यः मम नमस्कारः कथनीयः ।

भवदीयम् अभिन्नमित्रम्
शेखरः

## हिन्दी-अनुवाद

चेन्नई
दिनांक: 25.03.20--

प्रिय मित्र दिवाकर !

सप्रेम नमस्ते ।

कल मैं मित्रों के साथ चिड़ियाघर देखने कानननवन गया । वहाँ हमने अनेक पशुओं को देखा । सभी पशु इधर-उधर घूम रहे थे । सिंह उच्च स्वर में गर्जना कर रहे थे । मोर नाचने में मग्न थे । वास्तव में मोर के बिना चिड़ियाघर की भव्य शोभा कहाँ ? वहाँ आम के वृक्ष भी थे, कोयल भी (थी) । वास्तव में जहाँ आम के पेड़ (हों), वहाँ कोयल भी होगी । आगे फिर लिखूँगा । सभी के लिए मेरा नमस्कार कहना ।

तुम्हारा अभिन्न मित्र
शेखर

Scanned with CamScanner

(3) अनुजं प्रति लिखिते पत्रे मञ्जूषायां प्रदत्तैः शब्दैः रिक्तस्थानपूर्तिं कुरुत ।

(छोटे भाई को लिखे गए पत्र में मञ्जूषा में दिये गये शब्दों से रिक्तस्थानों की पूर्ति कीजिए ।)

मञ्जूषा- गणितविषये, छात्रावासतः, अनुज, आशिषः, ह्यः, शोभनः, तव, प्राप्ताः ।

(i) ....................

आगरा

दिनाङ्कः 25.03.20__

प्रिय (ii) .................... सोमेश !

सस्नेहं (iii) ....................।

(iv) .................... अहं तव पत्रं प्राप्तवान् । (v) .................... परीक्षा परिणामः (vi) .................... अस्ति, परं (vii) .................... भवता न्यूनाः अङ्काः (viii) .................... इति सखेदं मया अधीतम् । त्वं प्रतिदिनं प्रातःकाले उत्थाय गणितस्य अभ्यासं कुरु, गणिताध्यापकं च पुनः पुनः प्रश्नान् पृच्छ । अभ्यासेन एव सर्वाणि कार्याणि सिध्यन्ति । पित्रोः चरणयोः सादरं प्रणामः ।

भवदीयः अग्रजः

श्रीशः

उत्तरम्–

छात्रावासतः

आगरा

दिनाङ्कः 25.03.20__

प्रिय अनुज सोमेश !

सस्नेहम् आशिषः ।

ह्यः अहं तव पत्रं प्राप्तवान् । तव परीक्षापरिणामः शोभनः अस्ति, परं गणितविषये भवता न्यूनाः अङ्काः प्राप्ताः इति सखेदं मया अधीतम् । त्वं प्रतिदिनं प्रातःकाले उत्थाय गणितस्य अभ्यासं कुरु, गणिताध्यापकं च पुनः पुनः प्रश्नान् पृच्छ । अभ्यासेन एव सर्वाणि कार्याणि सिध्यन्ति । पित्रोः चरणयोः सादरं प्रणामः ।

भवदीयः अग्रजः

श्रीशः

हिन्दी-अनुवाद

छात्रावास

आगरा

दिनांक 25.03.20--

प्रिय अनुज सोमेश !

सस्नेह आशीर्वाद ।

कल मुझे तुम्हारा पत्र मिला । तुम्हारा परीक्षा परिणाम अच्छा है, परन्तु गणित विषय में तुमने कम अंक प्राप्त किये, ऐसा मैंने खेद के साथ पढ़ा । तुम प्रत्येक दिन प्रातःकाल उठकर गणित का अभ्यास न करो, गणित के अध्यापक से बार-बार प्रश्न पूछो । अभ्यास से ही सारे कार्य सिद्ध होते हैं । माता-पिताजी के चरणों में सादर प्रणाम ।

तुम्हारा बड़ा भाई

श्रीश

Scanned with CamScanner

(4) स्वविद्यालयस्य वर्णनं कुर्वन् मित्रं संजीवं प्रति अधः लिखितं पत्रम् उत्तर-पुस्तिकायां रिक्तस्थानपूर्तिं कृत्वा पुनः लिखत । सहायतायै मञ्जूषायां पदानि दत्तानि ।

(अपने विद्यालय का वर्णन करते हुए मित्र संजीव को नीचे लिखे पत्र को उत्तर-पुस्तिका में रिक्तस्थानों की पूर्ति करके पुनः लिखिए । सहायतार्थ मञ्जूषा में पद दिये हुए हैं ।)

मञ्जूषा– पुस्तकालये, संजीव, सस्नेहं नमस्कारः, शतप्रतिशतम्, मनोयोगेन, करोमि, क्रीडाक्षेत्रे, विद्यालयः ।

परीक्षाभवनम्

दिनाङ्कः 25.03.20--

प्रिय (i) ..................

(ii) .................. ।

भवतः पत्रं प्राप्तम् । मनः प्रासीदत् । यथा भवता कथितं तथा अहं पत्रोत्तरे स्व विद्यालयस्य वर्णनं (iii) .............. । मम (iv) .................. अतीव विशालः सुन्दरः च अस्ति । अत्र त्रिसहस्रछात्राः । (v) .................. पठन्ति । (vi) .................. पुस्तकानां पत्र-पत्रिकाणां च सुव्यवस्था अस्ति । (vii) .................. वालीबाल-बैडमिण्टन-क्रिकेट-रज्जु-आकर्षणादि-खेलानाम् उत्तमः प्रबन्धः अस्ति । बोर्डस्य परीक्षापरिणामः प्रतिवर्षम् (viii) .................. भवति । मातापित्रोः चरणयोः प्रणामाः ।

भवतः अभिन्नमित्रम्

क ख ग

उत्तरम्–

परीक्षाभवनम्

दिनाङ्कः 25.03.20--

प्रिय संजीव !

सस्नेहं नमस्कारः ।

भवतः पत्रं प्राप्तम् । मनः प्रासीदत् । यथा भवता कथितं तथा अहं पत्रोत्तरे स्व-विद्यालयस्य वर्णनं करोमि । मम विद्यालयः अतीव विशालः सुन्दरः च अस्ति । अत्र त्रिसहस्रछात्राः मनोयोगेन पठन्ति । पुस्तकालये पुस्तकानां पत्र-पत्रिकाणां च सुव्यवस्था अस्ति । क्रीडाक्षेत्रे वालीबाल-बैडमिण्टन-क्रिकेट-रज्जु-आकर्षणादिखेलानाम् उत्तमः प्रबन्धः अस्ति । बोर्डस्य परीक्षापरिणामः प्रतिवर्षं शतप्रतिशतं भवति । मातापित्रोः चरणयोः प्रणामाः ।

भवतः अभिन्नमित्रम्

क ख ग

## हिन्दी-अनुवाद

परीक्षाभवन

दिनांक : 25.03.20--

प्रिय संजीव !

सस्नेह नमस्कार ।

आपका पत्र प्राप्त हुआ । मन प्रसन्न हुआ। जैसा आपने कहा था, वैसे ही मैं पत्र के उत्तर में अपने विद्यालय का वर्णन

कर रहा हूँ। मेरा विद्यालय अत्यन्त विशाल और सुन्दर है। यहाँ तीन हजार छात्र मनोयोग से पढ़ते हैं। पुस्तकालय में पुस्तकों और पत्र-पत्रिकाओं की सुव्यवस्था है। क्रीडा के क्षेत्र में वालीबाल, बैडमिण्टन, क्रिकेट और रस्साकशी आदि खेलों का उत्तम प्रबन्ध है। बोर्ड का परीक्षा परिणाम प्रतिवर्ष शत-प्रतिशत रहता है। माता-पिताजी के चरणों में प्रणाम।

आपका अभिन्न मित्र

क ख ग

(5) भवती रश्मिः। भवती छात्रावासे पठति। भवत्याः अनुजः सूर्यः नवमकक्षायां संस्कृतं पठितुं न इच्छति। तं प्रेरयितुम् अधोलिखितं पत्रं मञ्जूषापदसहायतया पूरयित्वा उत्तरपुस्तिकायां पुनः लिखत।

(आप रश्मि हैं। आप छात्रावास में पढ़ती हैं। आपका छोटा भाई सूर्य नवम कक्षा में संस्कृत पढ़ना नहीं चाहता है। उसको प्रेरित करने के लिए निम्नलिखित पत्र मञ्जूषा के पदों की सहायता से भरकर उत्तर-पुस्तिका में पुनः लिखें।)

मञ्जूषा- संस्कृतभाषायाः, प्रेरणाप्रदम्, भोपालतः, उन्मीलितम्, शुभाशिषः, कृत्वा, अनुज, भवतः।

गङ्गाछात्रावासः

नवोदयविद्यालयः

(i)....................

दिनाङ्कः 25.03.20__

प्रिय (ii)............. सूर्य !

(iii) .................... ।

भवान् अष्टं कक्षायां नवतिप्रतिशतम् अङ्कान् प्राप्य उत्तीर्णः जातः इति (iv) .................... पत्रात् ज्ञात्वा अहम् अतीव प्रसन्ना अस्मि। शतशः वर्धापनानि। मया इदम् अपि ज्ञातं यत् भवान् नवम्यां कक्षायां संस्कृतविषयं स्वीकर्तुं न इच्छति। प्रिय वत्स ! (v) .................... ज्ञानं विना अस्माकं जीवनम् एव अपूर्णं भवति। अस्माकं संस्कृतसाहित्यं तु सम्पूर्णविश्वाय (vi) .................... अस्ति। तत्कथं भवान् तस्मात् अपूर्वज्ञानात् वञ्चितः भवितुम् इच्छति। मम तु ज्ञानचक्षुः एव अनेन (vii) .................... जातम्।

आशासे यद् भवान् नवमकक्षातः एव स्वज्ञानवर्धनं (viii) .................... अन्यान् अपि प्रेरयिष्यति। मातृपितृचरणयोः मे प्रणामाः निवेद्यन्ताम् इति।

भवतः अग्रजा

रश्मिः

उत्तरम्-

गङ्गाछात्रावासः

नवोदयविद्यालयः

भोपालतः

दिनाङ्कः 25.03.20--

प्रिय अनुज सूर्य !

शुभाशिषः।

भवान् अष्टं कक्षायां नवतिप्रतिशतम् अङ्कान् प्राप्य उत्तीर्णः जातः इति भवतः पत्रात् ज्ञात्वा अहम् अतीव प्रसन्ना अस्मि। शतशः वर्धापनानि। मया इदम् अपि ज्ञातं यत् भवान् नवम्यां कक्षायां संस्कृतविषयं स्वीकर्तुं न इच्छति। प्रिय वत्स!

संस्कृतभाषायाः ज्ञानं विना अस्माकं जीवनम् एव अपूर्णं भवति । अस्माकं संस्कृतसाहित्यं तु सम्पूर्णविश्वाय प्रेरणाप्रदम् अस्ति। तत्कथं भवान् तस्मात् अपूर्वज्ञानात् वञ्चितः भवितुम् इच्छति । मम तु ज्ञानचक्षुः एव अनेन उन्मीलितं जातम् । आशासे यद् भवान् नवमकक्षातः एव स्वज्ञानवर्धनं कृत्वा अन्यान् अपि प्रेरयिष्यति । मातृपितृचरणयोः मे प्रणामाः निवेद्यन्ताम् इति ।

भवतः अग्रजा

रश्मिः

## हिन्दी-अनुवाद

गंगा छात्रावास

नवोदय विद्यालय

भोपाल

दिनांकः 25.03.20--

प्रिय अनुज सूर्य !

शुभाशिष ।

आप आठवीं कक्षा में नब्बे प्रतिशत अंक प्राप्त करके उत्तीर्ण हुए, आपके पत्र से यह जानकर मैं बहुत प्रसन्न हूँ । शत-शत बधाईयाँ । मुझे यह भी ज्ञात हुआ कि आप नवमी कक्षा में संस्कृत विषय स्वीकार करना नहीं चाहते हैं । प्रिय भाई (बच्चे)! संस्कृत ज्ञान के बिना हमारा जीवन अपूर्ण होता है । हमारा संस्कृत साहित्य तो संपूर्ण विश्व के लिए प्रेरणा देने वाला है। तो क्यों आप उस अपूर्व ज्ञान से वञ्चित रहना (होना) चाहते हैं । मेरे तो ज्ञानचक्षु ही इसने खोल दिये ।

आशा है कि आप नवम कक्षा से ही अपना ज्ञान-वर्धन करके दूसरों को भी प्रेरित करेंगे । माता-पिता के चरणों में मेरा प्रणाम निवेदन करें ।

आपकी बड़ी बहिन

रश्मि

(6) भवान् 'चन्द्रः' । भवतां विद्यालये संस्कृतस्य सम्भाषणशिविरम् आयोजितम् आसीत् । स्व-अनुभवान् वर्णयन् भवान् स्वमित्रं सुरेशं प्रति पत्रं लिखति, परन्तु मध्ये कानिचित् पदानि त्यक्तानि । पत्रं पूरयित्वा पुनः उत्तरपुस्तिकायां लिखतु । सहायतायै अधः मञ्जूषा दत्ता ।

(आप 'चन्द्र' हैं । आपके विद्यालय में संस्कृत-सम्भाषण-शिविर आयोजित किया गया था । अपने अनुभवों का वर्णन करते हुए आप अपने मित्र सुरेश को पत्र लिखते हैं परन्तु बीच में कुछ पद छूट गए हैं । पत्र को पूरा करके फिर से उत्तर-पुस्तिका में लिखिए । सहायता के लिए नीचे मञ्जूषा दी हुई है ।)

मञ्जूषा - इन्द्रपुरीतः, हसित्वा, अभ्यासम्, सुरेश, सस्नेहं नमस्ते, वयम्, अभिनयं, मयि ।

अ 77, शालीमारबागः

(i) ....................

दिनाङ्कः 25.03.20--

प्रिय (ii) ....................

(iii) .................... ।

अत्र सर्वगतं कुशलम् । मन्ये भवान् अपि कुशली । गत सप्ताहे अस्माकं विद्यालये संस्कृतसम्भाषणशिविरम् आयोजितम् आसीत् । दशदिनानि वयं संस्कृतेन सम्भाषणस्य (iv) .................... कृतवन्तः । एकस्याः लघुनाटिकायाः मञ्चनम् अपि

(v) .................... अकुर्म । अहं तु विदूषकस्य (vi) .................... कृतवान् । सर्वे जनाः हसित्वा (vii) .................... पौनःपुन्येन करतलध्वनिम् अकुर्वन् । अहं तु इदानीं सर्वदा संस्कृते एव वदामि । मम शिक्षकाः अपि (viii) .................... स्नेहं कुर्वन्ति । त्वम् अपि प्रयत्नं कुरु । नूनं यशस्वी भविष्यसि । पितरौ प्रति मम प्रणामाञ्जलिं निवेदयतु ।

भवताम् अभिन्नहृदयः

चन्द्रः

उत्तरम्-

अ 77, शालीमारबागः

इन्द्रपुरीतः

दिनांकः 25.03.20--

प्रिय सुरेश !

सस्नेहं नमस्ते ।

अत्र सर्वगतं कुशलम् । मन्ये भवान् अपि कुशली । गत सप्ताहे अस्माकं विद्यालये संस्कृतसम्भाषणशिविरम् आयोजितम् आसीत् । दशदिनानि वयं संस्कृतेन सम्भाषणस्य अभ्यासं कृतवन्तः । एकस्याः लघुनाटिकायाः मञ्चनमपि वयम् अकुर्म । अहं तु विदूषकस्य अभिनयं कृतवान् । सर्वे जनाः हसित्वा हसित्वा पौनःपुन्येन करतलध्वनिम् अकुर्वन् । अहं तु इदानीं सर्वदा संस्कृते एव वदामि । मम शिक्षकाः अपि मयि स्नेहं कुर्वन्ति । त्वम् अपि प्रयत्नं कुरु । नूनं यशस्वी भविष्यसि। पितरौ प्रति मम प्रणामाञ्जलिं निवेदयतु ।

भवताम् अभिन्नहृदयः

चन्द्रः

## हिन्दी-अनुवाद

अ 77, शालीमार बाग

इन्द्रपुरी

दिनांकः 25.03.20--

प्रिय सुरेश !

सस्नेह नमस्ते ।

यहाँ सब प्रकार से कुशल है । मानता हूँ, आप भी सकुशल होंगे । गत सप्ताह हमारे विद्यालय में संस्कृत-सम्भाषण शिविर आयोजित किया गया था । दस दिन तक हमने संस्कृत सम्भाषण का अभ्यास किया । एक लघु नाटिका का मंचन भी हमने किया। मैंने तो विदूषक का अभिनय किया । सभी लोगों ने हँस-हँसकर बार-बार करतल ध्वनि की । मैं तो अब सदैव संस्कृत में ही बोलता हूँ । मेरे शिक्षक भी मुझसे स्नेह करते हैं । तुम भी प्रयत्न करो । निश्चित यशस्वी होओगे। माता-पिता को मेरा प्रणाम निवेदन करना।

आपका अभिन्न हृदय

चन्द्र

**(7) भवती सरोजिनी । भवत्याः वर्गेण अनाथबालकैः सह प्रतियोगितायां पराजयः अनुभूतः । आत्मानुभवान् वर्णयन्त्या भवत्या मातरं प्रति लिखितं पत्रं मञ्जूषापदसहायतया पूरयित्वा पुनः लेखनीयम् ।**

(आप सरोजिनी हैं । आपके वर्ग ने अनाथ बालकों के साथ प्रतियोगिता में पराजय का अनुभव किया । अपने अनुभवों का वर्णन करती हुई आप माताजी के लिए लिखे गए पत्र को मंजूषा के पदों की सहायता से पूरा करके फिर से लिखिए ।)

**मञ्जूषा**- सर्वे, पराजिताः, मातः, कुशलिनः, आयोजितवान्, सह, चरणस्पर्शः, सर्वगतम् ।

नूतनविद्यापीठम्
कर्णाटकतः
दिनाङ्कः 25.03.20__

पूज्ये (i) ....................

सादरं (ii) ....................

अत्र खलु (iii) .................... कुशलम् । मन्ये तत्रापि सर्वे (iv) .................... । मातः ! अस्माकं विद्यालयस्य समीपे एकः अन्यः विद्यालयः अस्ति । यत्र (v) .................... दीनाः असहायाः छात्राः एव पठन्ति । अस्माकं प्राचार्यः तस्य विद्यालयस्य दशमकक्षायाः छात्रैः (vi) .................... गीतान्त्याक्षरी-प्रतियोगिताम् (vii) .................... । जानाति भवती, वयं सर्वे तस्यां (viii) .................... जाताः । तेषां प्रदर्शनं तु अभूतपूर्वम् आसीत् । नूनं दर्पः सर्वं नाशयति, श्रमः सर्वत्र विजयते ।

पितृचरणयोः प्रणामाः ।

भवत्याः प्रिया सुता
सरोजिनी

**उत्तरम्**-

नूतनविद्यापीठम्
कर्णाटकतः
दिनाङ्कः 25.03.20__

पूज्ये मातः !

सादरं चरणस्पर्शः ।

अत्र खलु सर्वगतं कुशलम् । मन्ये तत्रापि सर्वे कुशलिनः । मातः ! अस्माकं विद्यालयस्य समीपे एकः अन्यः विद्यालयः अस्ति । यत्र सर्वे दीनाः असहायाः छात्राः एव पठन्ति । अस्माकं प्राचार्यः तस्य विद्यालयस्य दशमकक्षायाः छात्रैः सह गीतान्त्याक्षरी-प्रतियोगिताम् आयोजितवान् । जानाति भवती, वयं सर्वे तस्यां पराजिताः जाताः । तेषां प्रदर्शनं तु अभूतपूर्वम् आसीत् । नूनं दर्पः सर्वं नाशयति, श्रमः सर्वत्र विजयते ।

पितृचरणयोः प्रणामाः ।

भवत्याः प्रिया सुता
सरोजिनी

## हिन्दी-अनुवाद

नूतन विद्यापीठ
कर्णाटक
दिनांक : 25.03.20__

पूज्य माताजी !

सादर चरणस्पर्श ।

यहाँ सब प्रकार से कुशल है । मानती हूँ वहाँ भी सभी कुशल से हैं । माताजी ! हमारे विद्यालय के समीप एक अन्य विद्यालय है जहाँ सभी दीन-असहाय छात्र ही पढ़ते हैं । हमारे प्राचार्य ने उस विद्यालय की दशमी कक्षा के छात्रों के साथ

Scanned with CamScanner

गीतान्त्याक्षरी की प्रतियोगिता आयोजित की । आप जानती हैं, हम सब उस प्रतियोगिता में पराजित हो गये । उनका प्रदर्शन तो अभूतपूर्व था । निश्चित ही घमण्ड सबका नाश कर देता है, श्रम की सर्वत्र विजय होती है ।

पिताजी के चरणों में प्रणाम ।

आपकी प्यारी बेटी

सरोजिनी

(8) भवान् आशुतोषः । भवतः मित्रं शुभम् ऊन-एकोनविंशतिवर्षीयां क्रिकेटप्रतियोगितां विजित्य आगतः । स्वानुभवान् वर्णयन् भवान् स्वपितरं प्रति पत्रं लिखति । तस्मिन् पत्रे विद्यमानानि रिक्तस्थानानि मञ्जूषापदसहायतया पूरयित्वा पुनः लिखतु ।

(आप आशुतोष हैं । आपका मित्र शुभम् उन्नीस वर्ष से कम आयु की क्रिकेट प्रतियोगिता में विजयी होकर आया है । अपने अनुभवों का वर्णन करते हुए आप अपने पिता को पत्र लिख रहे हैं । उस पत्र में विद्यमान रिक्तस्थानों को मञ्जूषा के पदों की सहायता से पूरा करके पुनः लिखिए ।)

मञ्जूषा— पितृचरणाः, प्रार्थये, प्रणामाः, परितोषम्, विजयी, समाचारः, शुभम्, कुशलिनः ।

प्रतिभाविकासविद्यालयः,

इन्द्रप्रस्थम्

दिनांकः 25.03.20--

प्रातः स्मरणीयाः (i)....................

सादरं (ii)....................

अत्र सर्वं कुशलम् । तत्रापि सर्वे (iii) .................... सन्तु इति श्रीपतिं 'विष्णुं' (iv) .................... । आनन्दप्रदः (v) .................... अस्ति यत् मम मित्रम् (vi) .................... ऊन-एकोनविंशतिवर्षीयां क्रिकेटप्रतियोगितायां (vii) .................... भूत्वा प्रतिनिवृत्तः । अतः अहं महान्तं (viii) .................... अनुभवामि । आशासे यत् स भूयो भूयः बह्वीः प्रतियोगिताः विजेष्यते । भवानपि तस्मै वर्धापनपत्रं लिखतु ।

मातृचरणयोः साभिवादनं प्रणामाः, राधिकायै शुभाशिषः ।

भवतां वशंवदः

आशुतोषः

उत्तरम्—

प्रतिभाविकासविद्यालयः

इन्द्रप्रस्थम्

दिनांकः 25.03.20--

प्रातः स्मरणीयाः पितृचरणाः !

सादरं प्रणामाः ।

अत्र सर्वं कुशलम् । तत्रापि सर्वे कुशलिनः सन्तु इति श्रीपतिं 'विष्णुं' प्रार्थये । आनन्दप्रदः समाचारः अस्ति यत् मम मित्रं शुभम् ऊन-एकोनविंशतिवर्षीयां क्रिकेटप्रतियोगितायां विजयी भूत्वा प्रतिनिवृत्तः । अतः अहं महान्तं परितोषम् अनुभवामि । आशासे यत् सः भूयो भूयः बह्वीः प्रतियोगिताः विजेष्यते । भवानपि तस्मै वर्धापनपत्रं लिखतु ।

मातृचरणयोः साभिवादनं प्रणामाः, राधिकायै शुभाशिषः ।

भवतां वशंवदः

आशुतोषः

Scanned with CamScanner

## हिन्दी-अनुवाद

प्रतिभाविकास विद्यालय,
इन्द्रप्रस्थ
दिनांक 25.03.20--

प्रातः स्मरणीय पिताजी !

सादर प्रणाम ।

यहाँ सब सकुशल हैं । वहाँ भी सब कुशल हों, ऐसी श्रीपति विष्णु से प्रार्थना करता हूँ । (एक) सुखद समाचार है कि मेरा मित्र शुभम् उन्नीस वर्ष से कम उम्र वालों की क्रिकेट प्रतियोगिता में विजयी होकर लौटा है । अतः मैं बहुत सन्तोष का अनुभव कर रहा हूँ । आशा है कि वह बार-बार बहुत-सी प्रतियोगिताओं में विजय प्राप्त करेगा । आप भी उसके लिए बधाई पत्र लिख दें ।

माताजी के चरणों में अभिवादन सहित प्रणाम, राधिका के लिए शुभ आशीष।

आपका आज्ञाकारी
आशुतोष

**(9) मित्रं प्रति लिखितं निम्नलिखितं पत्रं मञ्जूषायां प्रदत्तैः पदैः पूरयत ।**

(मित्र को लिखे गए निम्नलिखित पत्र को मंजूषा में दिये पदों से पूरा कीजिए ।)

**मञ्जूषा**– वृक्षैः, मित्रम्, नमस्ते, अरुणाचलतः, अस्य, एव, वयं, गतसप्ताहे ।

(i)....................
दिनाङ्कः 25.03.20--

प्रिय (ii) .................... भास्कर !

सस्नेहं (iii) .................... ।

(iv) .................... अहं मित्रैः सह शैक्षिकभ्रमणाय 'दार्जिलिङ्ग' इति पर्वतीयस्थलं गतवान् । (v) .................... स्थानस्य सौन्दर्यम् अद्भुतम् (vi) .................... अस्ति । विशालैः (vii) .................... सुसज्जिता इयं देवभूमिः एव अस्ति । एवं प्रतीयते यत् (viii) .................... अन्यस्मिन् एव संसारे वसामः । इमं सुरम्यं प्रदेशं दृष्ट्वा इदम् असत्यम् एव प्रतीयते यत् पर्वताः केवलं दूरतः एव रम्याः । पर्वताः तु सदैव रम्याः एव भवन्ति । अहं त्वया सह अपि एकवारं तत्र पुनः गन्तुम् इच्छामि । आशासे आवां शीघ्रं गमिष्यावः । अधुना विरमामि । सर्वेभ्यो मम नमस्कारः कथनीयः ।

भवतः मित्रम्
शैलज

**उत्तरम्**–

अरुणाचलतः
दिनाङ्कः 25.03.20--

प्रियं मित्रं भास्कर !

सस्नेहं नमस्ते ।

गतसप्ताहे अहं मित्रैः सह शैक्षिकभ्रमणाय 'दार्जिलिङ्ग' इति पर्वतीयस्थलं गतवान् । अस्य स्थानस्य सौन्दर्यम् अद्भुतम्

Scanned with CamScanner

एव अस्ति । विशालैः वृक्षैः सुसज्जिता इयं देवभूमिः एव अस्ति । एवं प्रतीयते यत् वयम् अन्यस्मिन् एव संसारे वसामः । इमं सुरम्यं प्रदेशं दृष्ट्वा इदम् असत्यम् एव प्रतीयते यत् पर्वताः केवलं दूरतः एव रम्याः । पर्वताः तु सदैव रम्याः एव भवन्ति । अहं त्वया सह अपि एकवारं तत्र पुनः गन्तुम् इच्छामि । आशासे आवां शीघ्रं गमिष्यावः । अधुना विरमामि । सर्वेभ्यो मम नमस्कारः कथनीयः ।

भवतः मित्रम्
शैलजा

## हिन्दी-अनुवाद

अरुणाचल
दिनाङ्कः 25.03.20--

प्रिय मित्र भास्कर !

सस्नेह नमस्ते ।

गत सप्ताह मैं मित्रों के साथ शैक्षिक भ्रमण के लिए 'दार्जिलिंग' पर्वतीय स्थल को गया । इस स्थान का सौन्दर्य अद्‌भुत ही है । विशाल वृक्षों से सुसज्जित यह देवभूमि ही है । ऐसा प्रतीत होता है कि हम दूसरे ही संसार में रह रहे हैं । इस सुरम्य प्रदेश को देखकर यह असत्य ही प्रतीत होता है कि पर्वत केवल दूर से ही सुन्दर लगते हैं । पर्वत तो सदैव रम्य ही होते हैं । मैं तुम्हारे साथ भी एक बार वहाँ फिर जाना चाहता हूँ । आशा है हम दोनों शीघ्र ही जाएँगे । अब विराम देता हूँ । सभी को मेरा नमस्कार कहना ।

आपका मित्र
शैलज

**(10) मित्रं प्रति परीक्षासफलतायां लिखितं पत्रं मञ्जूषायां प्रदत्तैः शब्दैः पूरयत।**
(मित्र के लिए परीक्षा की सफलता पर लिखे गए पत्र को मंजूषा में दिये गये शब्दों से पूरा करो ।)

मञ्जूषा— परीक्षाभवनात्, सन्तोषः, अङ्कान्, साधुवादान्, कामये, प्राप्तम्, प्रिय मित्र, सप्रेमनमस्कारम्।

(i) ....................
दिनाङ्कः 25.03.20--

(ii) .................... !

(iii) .................... ।

भवतः परीक्षासफलतापत्रम् अधुनैव (iv) .................... । भवतः उत्तीर्णतां ज्ञात्वा मयि अति (v) .................... अस्ति । अहोरात्रं प्रयासं विधाय भवान् 95 प्रतिशतम् (vi) .................... लब्धवान् । त्वं मम परिवारजनः (vii) .................... अर्हसि । पत्रसमाप्तौ तुभ्यं पुनः वर्धापनम् (viii) .................... । पितृभ्यां सादरं नमः ।

भवतः प्रियमित्रम्
अ ब स

**उत्तरम्—**

परीक्षाभवनात्
दिनाङ्कः 25.03.20--

प्रिय मित्र !

सप्रेमनमस्कारम् ।

